यम् आकाशवाणी सम्प्रति वार्ताः श्रूयन्ताम्। प्रवाचकः - पुनीतत्रिपाठी

आदौ मुख्य वार्ताः

- वरिष्ठः धर्मगुरुः अयातुल्ला अलीरेज़ा अराफी इत्येषः अली खामेनेई इत्यस्य हत्यायाः अनन्तरं इरान-देशस्य अन्तरीम-सर्वोच्च-नेतृत्वेन कार्यं करिष्यति।
- अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेन तेहरानं सावधानं कृतं यत् अमेरिकादेशः तस्य उपरि सुदृढ-प्रहारं करिष्यति
- तमिलनाडुराज्यस्य मदुरै-नगरे अद्य अपराह्णे प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रायः सार्ध चतुः सहस्र-कोटिरूप्यकाणां आधारभूत-संरचना-प्रकल्पानाम् उद्घाटनम्, राष्ट्राय समर्पणं, शिलान्यासः च कृतः। सः अवदत् यत्, अद्यतनः कार्यक्रमः तमिलनाडोः विकासयात्रायाः गौरवपूर्णाध्यायः अस्ति।
- नागपुरस्य राउलगाव-इत्यत्र एस. बी. एल. एनर्जी लिमिटेड् इत्यत्र जाते विस्फोटे सप्तदश जनाः मृताः।
- अपि च
- आई. सी. सी. पुरुषाणां विंशतिं प्रति विंशति विश्वचषक- स्पर्धायां, अद्य सायङ्काले कोलकाता-नगरस्य ईडन-गार्डन्स-इत्यत्र अन्तिम-उत्कृष्टाष्ट-क्रीडायां भारतं वेस्ट्-इण्डीज-दलं सम्मुखि करिष्यति।

अथ वार्ता विस्तारेण

अयातुल्ला अलीरेज़ा

वरिष्ठः धर्मगुरुः अयातुल्ला अलीरेज़ा अराफी इत्येषः अली खामेनेई इत्यस्य हत्यायाः

अनन्तरं इरान-देशस्य अन्तरीम-सर्वोच्च-नेतृत्वेन कार्यं करिष्यति। इस्ना वार्ता-वाहिन्यानुसारं, अयातुल्ला अलीरेज़ा अराफी इत्येनं सर्वोच्चनेतृत्वस्य कर्तव्यानि निर्वोढुम् अस्थायीनेतृत्वपरिषदः सदस्यत्वेन नियुक्तः। यावत् ईरान्-देशस्य संवैधानिकप्रक्रियायाः अन्तर्गतं उत्तराधिकारी न चितः भविष्यति।

ईरानी-प्रशासनिक मीडिया

ईरानी-प्रशासनिक मीडिया माध्यमेन अद्य पुष्टि-कृतम् यत् अमेरिकी-इजराइली-वैमानिक-आक्रमणेषु ईरानदेशस्य सर्वोच्च-नेता अयातुल्ला अली खामेनेई दिवंगतः। तस्य मृत्युः अमेरिका-इस्राइल-संयुक्त-प्रक्षेपास्त्र-आक्रमणानन्तरं अभवत्, येषु ईरानस्य-सैन्य-स्थलानि लक्ष्यीकृतानि आसन्। ईराने चत्वारिंशत्-दिवसानां राजकीय-शोकः घोषितः। ईरानस्य प्रशासनिक वार्तावाहिन्यानुसारं देशस्य रक्षा-परिषदः सभां लक्ष्यीकृत्य कृतस्य आक्रमणस्य परिणामस्वरूपम् ईरानस्य सेनाप्रमुखः रक्षा-मन्त्री चोभौ मृत्युमुपगतौ । जनरल अब्दुल रहीम मूसावी तथा रक्षा-मन्त्री जनरल अजीज नासिरजादेह, तथा च ईरानस्य अर्धसैनिक-क्रान्तिकारिणां प्रमुखः एवं सुरक्षा-परामर्शदाता अली शमखानी अपि तस्मिन् आक्रमणे हताः। ईरानस्य प्रशासनिक वार्तावाहिन्या अद्य सैन्य-नेतृणां निधनस्य घोषणा कृता। तेन उक्तं यत् न्यूनातिन्यूनं द्विशताधिकाः जनाः मृताः तथा सप्तशताधिकाः जनाः व्रणिताः सन्ति। प्रतिवेदनानुसारं आक्रमणेषु प्रायः ईरानस्य-चत्वारिंशत् अधिकारिणः अपि हताः।

प्रत्युत्तरे ईरानदेशेन पश्चिम-एशियाक्षेत्रे आक्रमणानि आरब्धानि। दुबई, दोहा, बहरीन तथा कुवैत इत्येतेषु स्थानेषु ईरानेन आक्रमणानां वार्ताः प्राप्ताः। एतानि तानि स्थानानि सन्ति यत्र अमेरिकी-सैन्य-आधाराः सन्ति वा ये देशाः अमेरिकादेशस्य सहयोगिनः सन्ति। अमेरिकादेशस्य राष्ट्रपति डोनाल्ड ट्रम्पः सामाजिक

माध्यमे  लिखितवान् यत् खामेनेई इत्यस्य-निधनानंतरम्  ईरानी-जनानां कृते स्वदेशं पुनः प्राप्तुं महान् अवसरः अस्ति। सः अवदत् यत् आसप्ताहं अथवा दीर्घकालपर्यन्तं तीव्रं तथा सूक्ष्मं गोलिकावर्षणं प्रवर्तिष्यते।

विराम

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति। अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in

खामेनेई  शोकं

तेहरान्, इस्फ़हान तथा मशहद् चेत्यादिषु नगरेषु सहस्रशः जनाः स्वस्य सर्वोच्च-नेतुः अयातुल्ला अली खामेनेई इत्यस्य निधने शोकं प्रकटयितुं समागताः । राज्य वार्तावाहिन्या तस्य निधनं "रक्षक की शहादत" इति रूपेण निरूपितम्, यत्र तस्य अन्तः पराजयः न, अपितु राष्ट्रस्य सार्वभौमत्वाय अन्तिम-बलिदानरूपेण प्रदर्शितम्। नागरिकाः पवित्रस्थानेषु श्रद्धाञ्जलिं अर्पयन्ति तथा आक्रमणानां विरोधं कुर्वन्ति, यतः ईरान् देशः नेतृत्व-परिवर्तनाय वर्धित-राष्ट्रीय-सुरक्षायै च सज्जः अस्ति। मध्य-ईरानस्य इस्फ़हान् नगरस्य निवासिनः इमाम-चौक् इत्यत्र समागत्य आक्रमणानां विरोधं कृतवन्तः तथा अयातुल्ला खामेनेई इत्यस्य निधने शोकं प्रकटितवन्तः। पूर्वोत्तर-दिशि स्थिते मशहद् नगरे शोकाकुलाः जनाः स्वस्य दिवंगत-नेतारं श्रद्धांजलिं प्रदातुं इमाम-रज़ा पवित्र-तीर्थस्थले समागताः।

ट्रम्पेन -तेहरान

अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेन तेहरानं सावधानं कृतं यत् अमेरिकादेशः तस्य उपरि सुदृढ-प्रहारं करिष्यति इति। सः ट्रूथ् सामाजिकान्तर्जालीये पटले लिखिते

लेखे उक्तवान् यत् इरान-देशेन अद्यैव उक्तं यत् ते अद्य अतीव सुदृढप्रहारं करिष्यन्ति इति, यावत् पूर्वं कदापि न कृतम्। सः अवदत् यत् ते एतत् न करिष्यन्ति, तथापि यदि ते करिष्यन्ति तर्हि अमेरिका-देशः तेषाम् उपरि पूर्वं न दृष्टं तावत् शक्त्या प्रहारं करिष्यति। इरान्-देशः स्वस्य सर्वोच्चनेतुः अयातुल्ला खामेनेई इत्यस्य हत्यायाः प्रतिकारस्य प्रतिज्ञां कृत्वा, अमेरिका-इस्रेल-देशयोः आधार-स्थलेषु नूतनानि आक्रमणानि प्रारब्धानि।

प्रधानमंत्री-तमिलनाडु

तमिलनाडुराज्यस्य मदुरै-नगरे अद्य अपराह्णे प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रायः सार्ध चतुः सहस्र-कोटिरूप्यकाणां आधारभूत-संरचना-प्रकल्पानाम् उद्घाटनम्, राष्ट्राय समर्पणं, शिलान्यासः च कृतः। एतासु परियोजनासु कुम्भकोणम्, येरकाड, वेल्लोर इत्येतेषु स्थानेषु त्रीणि नूतनानि आकाशवाणी एफ्. एम्. प्रेषित्रा-यन्त्राणि सन्ति। एतानि प्रेषित्रा-यन्त्राणि क्षेत्रीय-प्रसारस्य विस्तारं करिष्यन्ति, अविरामं एफ़. एम.-प्रसारणं सुनिश्चितं करिष्यन्ति, राज्यस्य बहुविध-मण्डलेषु सार्वजनिक-प्रसारण-सेवां प्रसारणम् अपि वर्धिष्यन्ति। एन. डी. ए-दलस्य जनसभां सम्बोधयन् प्रधानमन्त्री अवदत् यत्, अद्यतनः कार्यक्रमः तमिळुनाडुराज्यस्य विकासयात्रायाः गौरवपूर्णाध्यायः अस्ति।

[(नल) - 1605 - पीएम-प्रोजेक्ट

श्रीमोदिना उक्तं यत् एताभिः परियोजनाभिः सम्पर्कं वर्धिष्यति, अर्थव्यवस्थायाः वृद्धिः भविष्यति, वृत्यावसरस्य सृजनं भविष्यति, लक्षशः जनानां जीवनं परिवर्तयिष्यते च। प्रधानमन्त्री तिरुप्पारन् कुन्द्रम्-नगरस्य अरुल्मिगु सुब्रमण्य-स्वामी-मन्दिरे अपि दर्शनं पूजां च विधाष्यति।

प्रधानमन्त्रीः पुद्दुचेरी

प्रधानमन्त्री नरेंद्रमोदी पुद्दुचेरी नगरे सप्तविंशत्यधिकशतकोटिरूप्यकाधिकमूल्यानां विकासपरियोजनानां शिलान्यासः राष्ट्रार्पणं च अकरोत्। प्रति-व्यक्ति-आयस्य वृद्धिं देशे च सर्वोच्च-सामाजिक-सूचकाङ्क-प्राप्तिं दृष्ट्वा प्रधानमन्त्रिणा पुडुचेरी-प्रदेशस्य प्रशंसा कृता। सः अवदत् यत् प्रशासनं अस्य केन्द्रशासितप्रदेशस्य विकासं अधिकं वेगेन अग्रे नेष्यति।

बाइट-पीएम मोदी ऑन बेस्ट पुद्दुचेरी - 33 से

तेन विश्वासः प्रकटितः यत् पुडुचेरी भविष्ये चिकित्सापर्यटनस्य प्रमुखकेन्द्ररूपेण उदयमानं भवितुं शक्नोति।

बाइट-पीएम मोदी ऑन मेडिकल टूरिज्म हब - 33 से

अस्मिन् कार्यक्रमे प्रधानमन्त्रिणा उन्नविंशतिः विकास परियोजनानां उद्घाटनम् अपि कृतम्। तासु परियोजनासु प्रधानमन्त्री ई बसयान सेवा, ई-बसयानानां प्रारम्भः, नगरे नवाचारम्, एकीकरणम् तथा स्थिरतां प्रोत्साहयितुं आर्थिकदृष्ट्या दुर्बलवर्गाणां कृते आवास-परियोजनाः, तथा च पुडुचेरी प्रशासनस्य प्रमुखाः जलापूर्ति-परियोजनाः समाविष्टाः सन्ति।

नागपुर विस्फोट

नागपुरस्य राउलगाव-इत्यत्र एस. बी. एल. एनर्जी लिमिटेड् इत्यत्र जाते विस्फोटे सप्तदश जनाः मृताः। महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्र फड्नविसेन सामाजिक-पटले सूचनैषा प्रदत्ता। विस्फोटनानन्तरं महती अग्निप्रकोपः अभवत्। अस्यां घटनायां अष्टादश कर्मचारिणः व्रणिताः। राष्ट्रिय-आपत्-प्रतिक्रिया-बलस्य, राज्य-आपत्-प्रतिक्रिया-बलस्य च दलानि तत्र आगतानि सन्ति, उद्धारकार्याणि च तीव्रवेगेन

प्रचलन्ति।

क्रिकेट

आई. सी. सी. पुरुषाणां विंशतिं प्रति विंशति विश्वचषक- स्पर्धायां, अद्य सायङ्काले कोलकाता-नगरस्य ईडन-गार्डन्स-इत्यत्र अन्तिम-उत्कृष्टाष्ट-क्रीडायां भारतं वेस्ट्-इण्डीज-दलं सम्मुखि करिष्यति।

॥ इति वार्ता: ॥